**शाम्भव** पु० शम्भोरयम् अण् । १गुग्गुलौ २कर्पूरे ३शिवमल्लिकायां राजनि०। ४विषभेदे शब्दच० ५शम्भुपुत्रे पु० ६देवदारुणि च न०र जवि० ७शिवसम्बन्धिनि ८तदुपासके च त्रि०। ९दुर्गायां स्त्री "शाम्भवी कुपिता तस्येति" तन्त्रम्।

**शा(सा)यक** पु० शो(सो) वा–ण्वुल् । १वाणे खड्गे च जटा०

**शार** दौर्बल्ये अद० चु० उभ० सक० सेट् । शारयति-ते अशशारत् त ।

**शार** न० शार-अच्, शॄ–घञ् वा । १कर्बूरवर्णे २तद्वति त्रि० अमरः ३वायौ पु० अमरः ४अक्षोपकरणे मेदि०।

**शारङ्ग** पुंस्त्री० शारं कर्बुरमङ्गं यस्य शक०। १चातकपक्षिणि २हरिणे ३गजे ४भृङ्गे ५मयूरे च । रायमुकुटः जातित्वात् स्त्रियां ङीष् । ६हिंस्रे ७वाद्ययन्त्रभेदे स्त्री ङीप् शब्दार्थचि० ।

**शारद** न०शरदि भवम्-ऋत्वण्। १श्वेतपद्मे राजनि०। २कासे ३बकुले ४हरिन्मुद्गे च पु० राजनि०। ५शरद्भवमात्रे त्रि० स्त्रियां ङीप्। शारदं श्वेतपद्ममस्त्यस्याः अच्। ५सरस्वत्यां स्त्री त्रिका०। ७नूतने ८अप्रतिभे त्रि० मेदि०। ९शालीने त्रि० विश्वः। १०दुर्गायां स्त्री टाप् "शरत्काले पुरा यस्मात् नवम्यां बोधिता सुरैः । शारदा सा समाख्याता पीठे लोके च नामतः" ति०त०। ११वानरभेदे शब्दर०। १२तोयपिप्पल्यां १३सप्तच्छदे स्त्री मेदि० ङीप् एवं १४कोजागरपुर्णिमायां स्त्री शब्दरत्ना० शरत्कालीने पूजादौ त्रि०स्त्रियां ङीप् । "शारदी चण्डिकापूजा त्रिविधा परिकीर्त्तिता। सात्त्विकी राजसी चैव तामसी चेति तां शृणु" भविष्यपु०। [भवे १श्राद्धे २तत्कालजे रोगे पु०

**शारदिक** न० शरदि भवं श्राद्धं रोगो वा ठञ् । शतत्काले

**शारदीय** त्रि० शरदि भवः छण् । १शरत्काले कर्त्तव्ये उत्सवादौ तथाभूतायां दुर्गापूजायां स्त्री "अदूरे जगदम्बायाः शारदीयो महोत्सवः"। "शारदीया महापूजा चतुःकर्ममयी शुभा" ति०त० ।

**शारि(री)** स्त्री शॄ–इञ् वा ङीप् । १पाशकादिगुटिकायां २अक्षोपकरणे च मेदि०। ३पक्षिभेदे च "शारीं चरन्तीं सखि ! मारयेति" नैषधम् । ४युद्धार्थगजपर्य्याणे ५व्यवहारभेदे मेदि० । ६कपटे धरणिः । स्वार्थे क । पक्षिभेदे वीणावादने च हेमच० ।

**शारिफल** पु० न०शारेः फलमिवाधारः । शारिफलके पाशकक्रीड़ासाधने द्रव्ये (छक्) अमरः स्वार्थे क । तत्रैव ।

**शारिवा** स्त्री शारिरिव वनति वन-ड । श्यामालतायाम् अमरः । "एकं वै शारिवामूलं सर्वव्रणविशोषणम्" वैद्य०।

**शारिशृङ्खला** स्त्री शारेः शृङ्खलेव । पाशकभेदे तद्भेदाश्च "चुत्कुरी तिन्तिड़ी द्यूतं पञ्चमी शारिशृङ्खला । नय पीठो चाष्टकाक्षो नयः स्याज्जयपुत्रकः । एते पाशकभेदाः स्युर्जयकोलाहलोऽपि च" शब्दर० ।

**शारीर** त्रि० शरीरस्येदम् अण् । १देहसम्बद्धे सुखदुःखादौ तस्येदमस्य पुनः अण् । २वृषे पु० मेदि० । शरीरमात्मत्वेनाभिमन्यते अण् । ३जीवे । स्वार्थे क । तत्रार्थे । शारीरं जीवं दुःखं वा अधिकृत्य कृतो ग्रन्थः कन् । व्यासकृते वेदान्तसूत्रे चिकित्साङ्गे सुश्रुतग्रन्थाद्येकदेशे च शारीरस्य दुःखं रोगादिकं यथोक्तं विष्णुपु० ६५अ० । "आध्यात्मिकोऽपि द्विविधः शारीरो मानसस्तथा । शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः । शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः । गुल्मार्शःश्वयथुश्वासछर्द्यादिभिरनेकधा । तथाक्षिरोगातिसारकुष्ठाङ्गामयसंज्ञकैः । भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि" सुश्रुतान्तर्गतशारीरकस्थानञ्च तत्र दृश्यम् ।

**शारीरिक** त्रि० शरीरे भवः ठक् । देहजाते दुःखादौ ।

**शारुक** त्रि० शॄ–उकञ् । हिंसके ।

**शार्कर** त्रि० शर्करा अस्त्यस्य अण् । १शर्करायुक्ते देशे शर्कराया विकारः अण् । २फाणिते ३दुग्धफेणे च पु०मेदि०। शर्करीछन्दोऽस्य अण् । शर्करीछन्दोयुक्ते ४मन्त्रादौ ।

**शार्ङ्ग** त्रि० शृङ्गस्य विकारः अण् । १शृङ्गजाते पदार्थे । २विष्णुधनुषि ३धनुर्मात्रे च पु० मेदि० ४आर्द्रके न० राजनि० । [न्विमात्रे त्रि०।

**शार्ङ्गिन्** पु० शार्ङ्गः अस्त्यस्य इनि । १विष्णौ अमरः । २ध-

**शार्दूल** पुंस्त्री० शॄ–ऊलञ् दुक् च । १व्याघ्रभेदे अमरः । २पशुभेदे ३शरभे ४राक्षसभेदे च मेदि० उत्तरपदस्थः । ५श्रेष्ठार्थे अमरः । ६पक्षिभेदे धरणिः ७चित्रके राजनि० । स्त्रियां सर्वत्र जातित्वे ङीष् ।

**शार्दूलललित** न० अष्टादशाक्षरपादके छन्दोभेदे तल्लक्षणं यथा "सः मो जः सतसा दिनेशऋतुभिः शार्दूलललितम्" छन्दोम० ।

**शार्दूलविक्रीड़ित** न० ऊनविंशत्यक्षरपादके छन्दोभेदे तल्लक्षणं यथा "सूर्य्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीड़ितम्" छन्दोम० ।

**शार्वर** न० शर्वर्य्यां इदं शैषिकोऽण् । १अत्यन्ततमसि ।